# द्वितीयं प्रकरणम्

## आयुर्दाय निरूपणम्

जैमिनीय सूत्रे जैमिनि महर्षिणा आयुर्दायाध्याये, आयुर्दाय निरूपणादारभ्य आयुर्दाय विचार चक्र, कक्ष्या ह्रास, निधन योग आयुर्दाय योग, अल्पायु-मध्यायु पाप शुभग्रह, ग्रहादीनां निरूपणं कृतं वर्तते । तत्र अन्तिमो मारकनाम्नांकित: । अत्र कस्य भावस्य स्वामी ग्रहो मारको भवति । अथवा कस्य भावेशस्य ग्रहस्यन्तर्दशायां मारको जायते इति निरूपितम् । शेषाणां पूर्वभागीयानां २४,२५,२६ तमानां तथा चोत्तर भागीयानां १०,११,१२ तमानामध्यायानामायुर्दाय नामैव दृश्यते । अथ च पूर्व-भागीये २७ तमे ध्याये पितृ मातृ भ्रातृ पुत्र स्त्री कुटुम्बादिकस्य चायुर्दायघोतको निर्याण विचारो विहित: ।

### आयुर्दाय स्वरूपम् :-

आयुर्दायस्यापि ज्योतिषशास्त्रेऽतिशयो महिमा वरीवर्ति । यतो हि जातको भाग्यान्वितो राजयोग युक्तो पि यद्यल्पायु योगाश्रित: तर्हि भविष्यस्य किं प्रयोजनम् । अपितु तस्य भाग्यस्यापर जन्मनि प्रयोग: एतादृशा अपि बहवो मानवा इतिहासे दरी दृश्यन्ते पेल्पायुर्योगिनो द्वात्रिंश वर्षेभ्यो पि पूर्वं राजयोग युक्तास्तेजास्विनो विश्वे नुपम कार्यं सम्पाद्य माना कालग्रास कलविता बभूवु: । केचिच्य योग भ्रष्टाजना महति कुले समत्पुन्ना ऐश्वर्यं बाल्यकाले एव भुक्त्वा पंचत्वमापन्ना: । निर्भाग्या अपि दीर्घायुर्योगिनो महत्कष्टं भुंजमाना जीवनमसहमाना मृत्यो: प्रतीक्षां कुर्वाणा भगवन्तं परमात्मानं प्रार्थयन्ते अचिरात् स्वर्गं लोकं गन्तुं । अतश्च ज्योतिष शास्त्रस्य

मुख्यं प्रयोजनं भविष्यद्योतनम् । यदि मानवस्यायुरेव नास्ति तर्हि भविष्य ज्ञानस्य किं प्रयोजनम् । अतएव भाग्य ज्ञानवदायुषो पि ज्ञानं मानवजीवने सुतरामावश्यकर । ज्योतिर्विद् विद्भिर्रायां दिशामामपि महान् प्रयासो विहितः ।

आयुषो भेदा :-

ज्योतिषे त्रिविधत्वामायुषो अल्पायुः मध्यमायुर्दीर्घायुर्भेदात् । द्वात्रिंशात् पूर्वमल्पायुः । ततुः षष्टि वर्षेभ्यो वान्निमध्यमायु योगः । एभ्यो द्वात्रिंशात् पूर्वमल्पायुः । ततुः षष्टि वर्षेभ्यो वान्निमध्यमायुर्योगः । एभ्यो भेदे भ्यो योऽन्यो प्येको योगो निगदितः यः केवलं कतिपयैरेव भाग्यशालिभिर्मन वेलाभ्यते स उत्तमायुर्नाम् । योगो स्य लक्षणं शताद्दूर्ध्वमायुः प्राप्तिरिति कथितम् । चतुर्विंशति वर्षेभ्यः पूर्वमायुषो ज्ञानं सम्यक् प्रकारेण न ज्ञातुं शक्यते । एभ्यो वर्षेभ्यो वाडि मृत्युबलि मृत्युर्नाम । अस्यापि त्रिविधत्वम् । पितृ दोष मृत्युमहि दोष, मृत्युररिष्ट दोष मृत्युश्चेति । अतो बालमृत्यु योग परिहारार्थं जप होम चिकित्साद्यैर्बालरक्षां यत्नेन कुर्यात् ।

अत्र मन्त्रेश्वरः -

तद्दोष शान्त्यै प्रतिजन्मतारमाद्वादशाब्दं जपहोम पूर्वम् ।
आयुष्करं कर्म विधाय तातो बालं चिकित्सादिभिरेव रक्षेत् । [१]

अत्रा पि त्रिविधस्यायुर्योगस्यापि प्रत्येकस्य पुनस्त्रिविधत्वेन नव भेदाः । अर्थादल्पायु-र्योगस्याल्प मध्य पूर्ण भेदेन त्रिविधत्वम् । एवं मध्यमा युर्दीर्घायुर्योग योरप्यवगन्तव्यम् ।

मारक स्थानस्व मारक नक्षत्रस्ये च विचार: । अल्पायु योगिनस्तु विपत्तारायां मृत्युर्भवति । एवंच मध्यमायुर्योगिन: प्रत्यरितारायां दीर्घायुर्योग युक्तस्य च वधतारायां प्राणान्तो भवतीति भाव: । ताराज्ञाने तु जन्म नक्षत्रात्तृतीय नक्षत्रं विपत्तारा पंचमंच प्रत्यरिस्तथा सप्तमंच वधतारेति ज्ञेयम् ।

## त्रिविधायुर्योगज्ञान प्रकार :-

लग्नेशाष्टमेशावत्रायुर्भेद दर्शने मुख्याविति । यदि चरराशिस्थौ तथा चैनयोर्मध्ये स्थिरस्थ एको द्विस्वभावस्थश्चान्यस्तर्हि दीर्घायु योग: । यदि द्वावेव द्विस्वभावगौ तथा चैनयोर्मध्ये चरस्थश्चैक स्थिरस्थश्चान्य स्तर्हि मध्यमायुर्योग: ।यदि द्वावेव स्थिरस्थौ तथा चैकश्चरस्थो न्यश्च द्विस्वभावस्थस्तर्हि दीर्घायुर्योग: ।

[1]आयु: पितृदिनेशाभ्याम्, प्रथमयोरुत्तयोर्वा दीर्घम् । प्रथम द्वितीययोरन्त योर्वा मध्यमम् । मध्ययोराद्यन्तयोर्वा हीनम् । एवं मन्द चन्द्राभ्याम् पितृकालतश्च । संवादात् प्रामाण्यम् ।[2] अनेनैव प्रकारेण लग्नचन्द्राभ्यामपि विज्ञातव्यम् । तथा च होरालग्न जन्म लग्नाभ्यामपि । यदि प्रकारत्रयेण एकमायु र्भवेत्तर्हि युक्तमेव । अथ च प्रकारद्वयेन समं स्यादेकेन च भिन्नतर्हि प्रकार द्वयस्य मतं ग्राह्यम् । प्रकारत्रये विभिन्नत्वे सति जन्मलग्न होरालग्नाभ्यामागतमायुर्ग्राह्यम् । अत्र द्वितीय प्रकारे जैमिनीय सूत्रे मन्दचन्द्राभ्यामिति पाठस्तत्र च टीकासु महान् भेद: । कैश्चिट्टीकाकारैर्मन्द चन्द्राभ्यामित्य लग्नचन्द्राभ्यामित्यर्थ: कृत: । कैश्चित्तु शनि चन्द्राभ्यामितयर्थो विहित: । मुम्बई संस्करणे शनि, चन्द्राभ्यामित्यपि पाठो स्ति । परं जैमिनीय सूत्रे आचार्य नीलकण्ठ प्रभृतिभिर्विद्वभिर्लग्न चन्द्राभ्यामित्येवार्थ: स्वीकृत : ।

तेश्च शनि चन्द्राभ्यामित्यस्य निर्देशो पि न विहित: । मन्द शब्देन शनिर्गृह्यते परं पाराशरीये शास्त्रे क्वचित्तथा जैमिनीये सूत्रे तु सर्वत्र कटपयेति प्रकार चतुष्टयेन वर्ण-संख्ययैव शब्दार्थो भवति तेन च मन्दशब्देनैक संख्यया लग्नमेवोक्तं प्रतिभाति ।[3] आंगल भाषा टीकाकारेण सुप्रसिद्धेन ज्योतिर्विदा सूर्य नारायणराय महोदये नाप्येष एव पन्था नसृत: ।[4] अत्रास्मिन् ग्रन्थे व्याख्यान मिदमप्युपलभ्यते यच्छनिचन्द्राभ्यामायुर्ज्ञानं कुर्याद्यथा च लग्ने सप्तमे च चन्द्र: स्यात्तदा लग्नचन्द्राभ्यामा-युर्विचार: कुर्यात् । जैमिनि सूत्रे तूभयत्र मन्द्र चन्द्राभ्यामेव पाठ: । सत्यपि शनि चन्द्राभ्यामिति पाठे लग्न चन्द्राभ्यामित्यर्थ स्यैवौचित्यं प्रतिभाति यतो ग्र मुम्बई संस्करणे तु स्पष्ट रूपेणायं पाठ उपलभ्यते ।

लग्नाष्टमेशयोरेक: त्वपरं लग्न चन्द्रयो: ।
विलग्न होरयोरन्यदिति पक्ष त्रयं द्विजेति ।।[5]

अत्र सुस्पष्टमेव । काशी संस्करणे च मन्द चन्द्राभ्यामित्येव पाठ: । परं टीका कारेणार्थ शनि चन्द्राभ्यामिति लिखित तच्चनोचितं मुम्बई संस्करणे स्पष्टतया लग्न चन्द्राभ्यामिति पाठस्य दर्शनात्तथाचार्य नीलकण्ठ प्रभृतिक प्रतिकूलत्वादिति भव भाव: ।[6] वर्ण संख्या भेदेनापि नवभेद प्रकारो त्र- द्वात्रिंशत्, चतुष्षष्टि:, षण्णवति, षट् त्रिंशत् द्विसप्तति:, अष्टोत्तरशतं, चत्वारिंशदशीति विंशोत्तरशतमिति । भेदेन एषां ज्ञानाय विचारो निम्नप्रकारेण विहित: । यद्येकेन प्रकारेणाल्पायुस्तदा द्वात्रिंशद्वर्ष संख्याकम् ।मध्यमायुश्चेत्तर्हि चतु: षष्टि दीर्घायुश्चेत् षण्णवति इत्थं

प्रकारेणद्वयेन सति षट्त्रिंशत् द्विसप्ततित्यष्टोत्तर शतं ज्ञेयम् । प्रकारत्रयेण सति चत्वारिंशदशीति विंशोत्तर शतमिति ज्ञेयम् ।

स्पष्टायुर्योगं निरूपयति -

प्रकारेणैकेनायुषः सम्पन्ने योगकारकयोः ग्रहयोरंशादिकं द्विभिर्विभजेत् लब्धांशादिकं प्राप्त खण्डेन गुणीकृत्य पुनर्द्वादश संख्यया गुणीकुर्यात्तश्च त्रिंशत्संख्याहृते-मासा भवन्ति ।

द्वादशसंख्याहृते वर्षादिकं बोध्यम् । तच्चानुपातेनाल्पायुर्योगे द्वात्रिंश-त्संख्या यां मध्यायुषि षड् त्रिंशत्संख्यायां दीर्घायुषि चत्वारिंशद संख्यायां न्यूनीकुर्यात्तश्च स्पष्टा युर्योगः । एवमेव प्रकार द्वये लब्धायुषि पूर्ववत् योयकारकयोर्ग्रहयोरंशादिकं चतुर्भिर्हरेत् लब्धांशादिकं पूर्ववदायुः खण्डेन गुणीकृत्य पुनश्च द्वादशभिर्गुणीकुर्यात् शेषा क्रियापूर्ववत् । एवं प्रकारत्रयेण लब्धायुषि ग्रहाणामंशादिकं षडसंख्यया हरेत् पुनश्च द्वादशैर्भिर्गुणीकुर्याच्छेषा क्रियात्रापि पूर्ववैव बोध्या ।

कक्ष्याह्रास वृद्धि विचार :- निधन योगश्च -

पूर्वोक्त प्रकारेण लब्धायुषि कक्ष्या ह्रास वृद्धिरपि भवति । पूर्वं ह्रास निरूपणम् । अत्र यदि शनिरायुर्योग कारकश्चेतर्हि कक्ष्याह्रासो भवति । कक्ष्याह्रासे-नात्रोत्तमायुश्चेत्तर्हि दीर्घायुः दीर्घा युश्चेत्तर्हि मध्यमायुर्मध्य मायुश्चेत्तर्हि अल्पायुरल्पा युश्चेत्तद्धीयुसो भाव इत्यर्थः । अथापि शनिर्लग्नेशेन होरेशेन वान्वितः स्यादथवा नीच

राशिः पापयुतौ दृष्टौ वा स्यादिति भावः । अन्यथा स्वोच्चस्थः शुभग्रह युतौ दृष्टौ वा शनिः कक्ष्यावृद्धिकरः अर्थादल्पायुर्योगे सति मध्यमायुर्मध्यमा युषि चोत्तमा युरिति भावः । अस्य विकल्पो सम्यक् रूपेण जैमिनि सूत्रे दृश्यते यथा –

'शनौ योग हेतौ कक्ष्या ह्रासः' विपरीतमित्यन्ये'[७] एतस्मिन् द्वितीय सूत्रे विपरीतेति शब्देन शनौ योगकारके सति न कक्ष्याह्रासः केश्चित्स्वीक्रियते एवमेव लग्ने सप्तमे वा गुरौ स्वोच्चस्थे शुभग्रह युते दृष्टे वा सति चायुषः कक्ष्या वृद्धिर्ज्ञेया ।

अथ द्वार बाह्यराशिभ्यां मृत्युविंचारः निरूप्यते । द्वार शब्देन स राशिस्त्र गृह्यते यस्माच्चर स्थिर ब्रह्मग्रहनवांशादि भेदेन दशा रम्भो भवति । कुत्र चित्रल्लग्नात्कुत्राचित्सप्तमात्कुत्रचिद् ब्रह्म ग्रहान्नवांशाद्वा दशा रम्भो क भवति । अतः संलग्न एव द्वार लग्नो यस्माद्दशारम्भो जायते इतिभावः । अस्यैव द्वितीयं नाम पाकराशिरिति । जन्मलग्नाद्यावद्दूरं बाह्यराशिरूच्यते ।

'दशाश्रयो द्वारम्' ततस्तावतिथं बाह्यम्'[८] यदि भौ द्वौ राशी राशीशौ वा पापौ पापाक्रान्तौ पापदृष्टौ वा भवेताम् तदा तयोर्नवांश राशीशयोर्वा नवांशदशायां मृत्यु योगः ।

मलिने द्वार-बाह्ययो नवांशे निधनं द्वार द्वारेशयोश्च मालिन्ये शुभग्रहयोयान्न । अन्यदपि जन्मलग्नादष्टमेशे चोच्चस्थे न नवांश दशायां मृत्युरिति । अपि तु नवाब्दायु-र्वृद्धियोगः । पाराशरीये-अस्मिन् ग्रन्थे लग्नेशे पि तुंगस्थे पमेव योगः ।[६]

अस्मिन्वृद्धि योगे सति पदाश्रित राशीशस्य लग्नारूढ़ राशीशस्येति भाव: दशान्तरे थ वास्यैव नवांशदशायां मृत्यु योग: लग्नेशष्टमेश योर्मध्ये यो बलवान स च यदि केन्द्र-स्थस्तदा दीर्घायुर्योग: स पण फरस्थश्चेत्तर्हि मध्यमायुर्योग: आपोक्लिमराशिस्थ स्चेत्तर्हि चाल्पायुर्योग: जैमिनि सूत्रमप्यत्र पितृलाभ रोगेशे प्राणि निकण्टकादिस्थे स्वतश्चैवं त्रिधा ।[10]

अत्रापवादमाह- जन्मलग्नस्य सप्तमस्थानान्नवमभावे चात्मकारको ग्रहश्चेत्तर्हि वैपरीत्यम् । अर्थात् दीर्घायुश्चे दल्पापुरल्पा युश्चेद्दीर्घायुर्मध्यमायुश्चेन्मध्य मायुरेवेति ।

नीलकण्ठाचार्येण जैमिनिसूत्र टीकायाम् अस्य प्रकारस्योल्लेख: केषांचिदाचार्याणां मतेन निर्दिष्ट: । स्वकीयमतन्त्वस्येदम् । दीर्घन्चेन्मध्यं चेदल्पमल्पचेन्न किंचिदित्यर्थ: ।[11] अथ लग्न-पंचम नवमेषु पाप योगे सति कदा ह्रास: । कारकांश लग्नेशस्य तत्सप्तमे शस्य वा पापमध्य वर्तितत्वे कक्ष्याह्रास: । जन्म कारकांश लग्नेशस्य तत्सप्त मेशस्य वा पाप मध्यवर्ति तत्वे कक्ष्या ह्रास: । जन्मलग्नात् कारकलग्नात् च लग्ने सप्तमे द्वितीये द्वादशे षष्ठे ष्टमे च शुभ ग्रह योग सति कक्षा वृद्धि: । त्रिकोणे च्येनयो: शुभग्रह योगे कक्ष्या वृद्धि: । अत्र पूर्वोक्त स्थानेषु नीच पाप ग्रह योगे सति कक्षा ह्रास इति स्पष्टम् । अथ च वृहस्पतिरपि द्वितिय द्वादश षष्ठस्थो थ वा त्रिकोणे पाप युते य वा नीचस्थ: पापा क्रान्तश्चेत्तर्हि कक्ष्या ह्रास: ।

लग्नादात्मकारकाच्च वृहस्तेरपि द्विर्द्वादशषष्ठाष्टम त्रिकोणेषु शुभ ग्रह योग प्रकरणे पूर्णचन्द्र शुक्रयोर्योगे सति न कक्ष्या वृद्धि: । प्राप्तदशायां केवलमेकवर्ष योग: कार्य: । शनिना योगे सति कक्ष्या ह्रास एक राशि ह्रास इत्यर्थ :

'पूर्णेन्दु शुक्र योरेकराशिवृ द्धि: शनौ विपरीतम्' इति सूत्रद्वयेन स्पष्टम् ।

अपवादन्तरमाह -

दशा प्रकरणे स्थिर दशा स्वरूपे चर स्थिर द्विस्वभाव राश्यानुसारं सप्ताष्टनव संख्या वर्षाणि उक्तानि । तदनुसारं दशाराशितः आरभ्य राशित्रय विभाग पूर्वकं खण्ड चतुष्टयम् । अत्र खण्डानुसारं मृत्युयोमधीकृत्य मरणं ज्ञेयम् । अत्र जैमिनिय सूत्रे टीकाकारैः खण्डत्रयं स्वीकृतमस्ति । तदनुसार मेवाल्पायुश्चेत्प्रथम खण्डे मध्यमायुश्चेद् द्वितिय खण्डे दीर्घायुश्चेत्तर्हि तृतीय खण्डेमरणाम् । मरण खण्डात्पूर्वं मारक राशेर्दशा वृत्तौ च क्लेशाधिक्यं न मरणामिति । विशेषः । अत्र मृत्यु कारके खण्डे पापग्रह मध्यस्थे राशौ लग्नात्कारक लग्नाच्च पापा क्रान्ते त्रिकोण राशौ वा मृत्यु योगः । द्वादशाष्टमेशयोः क्षीण चन्द्र शुक्र दृष्टयोः सतोः तयोर्दशायामपि मरणाम् ।

दशाप्रदराशितोऽष्टमेशोयं राशिंपश्यति तस्य तथा जन्मलग्नादष्टमेश षाष्टेश दृष्टराशेर्दशाया वा मरणामिति भावः ।

'पाप मध्ये पाप कोणे रिपु रोगयोः पापे वा' तदीशयोः केवल क्षीणेन्दु शुक्र दृष्टौ वा १२ ग्रहाणां शूल रूद्र महेश्वर बलेति चतुष्टय भेदमधिकृत्या-युदये मृत्यु विचारः ।

शूलस्य लक्षणाम् -

लग्न सप्तमयोर्मध्ये यो ग्रहो बली सः शूल ग्रह इत्युच्यते । द्वितीयाष्टमेशयोर्मध्ये यो बली सः रूद्र इत्युच्यते । अत्र भेदद्वयम् । एतयोर्मध्येयः शुभदृष्ट स बलवान् रूद्र इति कथ्यते । द्वितियो यो बलवान्नास्ति अपितु पाप दृष्टश्च स द्वितिय गौण रूद्र इति कथ्यते ।

पितृ लाभ भावेश प्राप्ती रूद्र: अप्राप्यपि पाप दृष्ट:[२३] । सूत्रद्वयमुपलभ्यते । अत्र शूलस्यापि द्वादशराशीनां दशाराशित आरम्य भेदत्रयमस्ति प्रथम द्वितीय तृतीय संज्ञया ।

महेश्वर लक्षणम् -

कारक लग्नादष्टमेशो महेश्वर ग्रह: यथात्मकारकेश: स्वोच्चस्थस्तदात्म कारकादष्टमेश द्वादशेशयोर्मध्ये यो बलवान् सो महेश्वर: । यदि द्वावेव बलिनौ तर्हि द्वावेवाष्टम द्वादशेशाविति महेश्वरौ ।

यथात्मकारको राहुणा केतुना वा युतश्चेदथात्मकारकादष्टमस्थौ राहुकेतुवास्यात्तदाष्ट मेश द्वादशेयोर्मध्ये बलवानेव महेश्वर: । कारक लग्नादष्टमस्थो ग्रहो पि महेश्वर ग्रह: । यथात्मकारकेश: स्वोच्चस्थस्तदात्म कारकादष्टमेश द्वादशयोर्मध्ये यो बलवान् सो महेश्वर: । यदि द्वावेव बलिनौ तर्हि द्वावेवाष्टम द्वादशेशाविति महेश्वरौ । यथात्मकारको राहुणा केतुना वा युतश्चेदथात्मकारकादष्टमस्थौ राहुकेतुवास्यात्तदाष्टमेश द्वादशयोर्मध्ये बलवानेव महेश्वर: । कारक लग्नादष्ट मस्थो ग्रहोपि महेश्वर: ।

ब्रह्मग्रह लक्षणमाह -

लग्न सप्तमयोर्मध्यो यो बली तस्माष्टमेश षाष्ठेश द्वादशे शेषु यो बली स ग्रहो लग्ने बलवति तस्य पृष्ठ राशिषु विषम राशौ स्थितो ग्रहो ब्रह्मेति संज्ञक: । अत्र विशेष: यदि शनि राहु केतुषु कश्चिदेको ब्रह्म लक्षणं प्राप्नोति तर्हि स न

ब्रह्मेति परं च तेभ्यः षष्ठो ग्रहो ब्रह्मेति कथ्यते । अत्र गणना सूर्यादि ग्रह संख्याया परिज्ञेया । बहुषु ब्रह्म संज्ञां गतेषु सत्सु आत्मकारक एव ग्रहो ब्रह्मेति । पूर्वमुक्तं यत्शनि राहु केतूनां ब्रह्मत्वाभावः परं च यथात्मकारकत्वेन राहोर्यदि ब्रह्मत्वं प्राप्तं भवेत् तर्हि किं कार्यं अस्य प्रश्नस्येदमुत्तरं सर्वाधिकांश युक्तस्यात्म कारकस्य स्थाने न्यूनांश युक्तस्य ग्रहस्य ब्रह्मत्व मित्येकः प्रकारः न्यूनांशश्चेद्राहुः तदा सो पि ब्रह्मा भवितुमर्हतीति द्वितीय प्रकारः —

'बहूनां योगे स्वजातीयः' राहु योगे विपरीतम्' [१४] इति सूत्रद्वयस्य व्याख्याने द्वितीय प्रकारस्यैवौचित्यं स्वीकृतम् । तेनेदं स्पष्टं भवति पञ्चैक ग्रहेषु ब्रह्मलक्षणं प्राप्तेषु ग्रहेषु राहोरपि ब्रह्मेति संज्ञा प्राप्ता चेत्तर्हि सो पि ब्रह्मा भवति यदि सर्वेभ्यो न्यूनांश इति स्पष्टम् । अत्र ग्रहाणां बल व्याख्याने पि विशेषः सो त्र प्रसंगान्निरूप्यते । अग्रहात्सग्रहो राशिर्बलवान् । सग्रहादपि बहु ग्रहयुक्तो राशिर्बलवानिति । ग्रह संख्याया मपि राशिद्वयमध्ये सति यत्रोच्च ग्रहस्तिष्ठेत्त द्राशेर्बलवत्त्वमिति । उच्चादि बले साम्ये पि निसर्ग बलं ग्राह्यम् । अर्थान्निसर्गबले चर राशितः स्थिर राशिः स्थिरतो द्विस्वभाव राशिर्बल वानिति भावः ।

## मारक ग्रह विचार :-

जन्मकुण्डल्यां तृतीयाष्टमौ भावौ मनुष्यस्यायुर्घातकौ तयोर्व्ययभावौ द्वितीय सप्तमौ भावौ मारक भावावित्यर्थः । तत्रापि सप्तमाद् द्वितीय भावस्य मारकत्वं बलवत्तरम् । इति सामान्य विचारः ।

आत्मकारकांश लग्ना-तथा जन्म लग्नांच्च तृतीयषष्ठाष्टम द्वादश द्वितीय

सप्तम स्थानाधिपास्ते सर्वे मारका उच्यन्ते । तेषु बलवत्तरो मुख्यमारक इति । सर्वेष्वेव समान बलवत्सु षष्ठेश एव मुख्य मारक इति भाव: । मारक ग्रहाश्रित राशिदशायामथ च मारक ग्रहराशि दशायां पाप ग्रह योगे निश्चितो मृत्युरिति ।

यदि सर्वे मारका बलशालिनस्तर्हि तेषां दशाकाले रोगकष्टादि संभव: । परंच मृत्युस्तु षष्ठेशस्य दशायामेव निश्चित: । एषां मारकनामन्तर्दशास्वपि भयशोकौ तस्कराग्नि भीति रोग दु:खार्ति रिति कष्टादिकस्य सम्भव इति विशेष: । षष्ठाष्ट मेशयोर्मध्ये पि प्रायश अष्टमेश एव मारक: । परंच षष्ठेशे पाप बाहुल्ये सति स एव मुख्य मारक: । दीर्घायुर्मध्यामायु योगत्वेन मारकत्वं दर्शयति । मध्यमायु-योगे षष्ठात्षष्ठे ताराद्वापि त्रिकोणगो ग्रहो मारक: । षष्ठेशाश्रित राशीश दशायामपि मृत्युयोग: ।

दीर्घायुर्योगे तु षष्ठराशेस्तदीशस्य वा त्रिकोणस्थो यो ग्रहस्तस्य तदाश्रितस्य राशीशस्य वा दशायां मृत्युयोग: । राहु केतू अपि लग्न सप्तमाष्टमद्वादश भावस्थौ मारकेश युतौ मारकेशात्सप्तगौ वा मारकौ भवत: ।

पितृकारकमाह -

चरस्थिरभेदेन कारकस्य द्विविधत्वम् । अत्रस्थिरकारकानुसारं पितृकारकमाह-सूर्य: शुक्रश्च स्थिर मिर्ते पितृकारकौ प्रोक्तौ परंचानयोर्मध्ये यो बलवान् स मातृ कारक: इत्युक्तम् ।

यद्यत्र कश्चिद्ग्रहो बलशाली भवति परंच स पाप ग्रह दृष्टश्चेत्तदा स बलहीन एव ज्ञेय इति विशेष: । यदि पित्रादिकारकौ द्वावेव ग्रहौ बलशालिनौ भवत: तथा तत्र द्वावेव पितृ मातृ पुत्रादि कारकौ ज्ञेयौ । अर्थात् शुभाशुभस्य द्वाभ्यामेव विचारो विधेय इत्यपि विशेष: । यदि पित्रादि कारकौ द्वावेव ग्रहौ बलशालिनौ भवत: तथा तत्र द्वावेव पितृ मातृ पुत्रादि कारकौ ज्ञेयौ अर्थात् शुभाशुभस्य द्वाभ्यामेव विचारो विधेय इत्यपि विशेष: । एवं यदि पित्रादि कारकौ ग्रहौ बलवांस्तथा शुभ ग्रह दृष्टश्च भवेत्तदा मातृ कारको ग्रहो यास्मिन् राशौ तिष्ठेतस्य त्रिकोण राशिगस्य ग्रहस्य राशेर्वा दशायां माता पित्रोर्मरणवाच्यम् ।

बलहीन ग्रहेषु एव अष्टमेशो यदि बलशाली तदा यत्राष्टमे शस्तिष्ठेतस्य राशितस्त्रिकोण दशायां मरणं भवतीति विशेष: । मातृ-पितृ कारकाभ्यां यदष्टमेशो बलवांस्तदाष्टमेशस्य शूलदशायां मरणं भवितुमर्हति । अथवा पितृ-मातृ कारकयो: शूलदशायां माता पित्रोर्मरणं ज्ञेयम् । बलान्वित ग्रहस्य फल विचारे तदाश्रयीभूत राशिशानुसारमपि बलं विचार्यम् । बलहीन ग्रहस्य फल विचारे तस्य द्वादश भावगत ग्रहानुसारमपि फलं विचार्यम् । सर्वं रूद्रशूल विचार वदत्रापि विचारो विधेय इति विशेष: ।

लग्नाद् द्वादश भावे सूर्यबुधौ स्वराशिस्थौ स्यातान्तदा लग्नस्य पंचम् राशे: शूलदशायां पितुर्मरणं वाच्यम् । यद्यत्र मेषलग्नमेव स्यात्तदा पंचम राशे: शूलदशायां पितुर्मरणं वाच्यम् । यद्यत्र मेष लग्नमेव स्यात्तदा पंचमराशेर्दशा यां वा पितृमरणं ज्ञेयम् ।

अर्क योगे तदाश्रये क्रिये लग्न मेष दशायां पितुरित्येके क्रिये मेषराशौ रविज्ञयोगाश्रये लग्ने मेषस्य दशायां पितृमरणम् ।[१५] यदि लग्ने पापग्रहा मेषराशौ च सूर्यस्तदायं मेष महापावती नाम योग उच्यते । तदापि पितृमरणं भवितुमर्हति ।

बाल्ये मातृ पितृ मरण योगमाह -

मातापित्रोः कारकौ बलशालिनौ बलहीनौ व भवेताम् । परंच तौ यदि सूर्यं विहाय अन्य पाप ग्रह युतौ शुभग्रह दृष्टि हीनौ च स्यातान्तदा जातकस्य दशवर्षायुः प्रागेव माता पित्रोर्मरणं प्रोक्तम् । यदि पाप दृष्टौ मातृ पितृ कारकौ सूर्य दृष्टावपि स्यातान्तदा पूर्वोक्त योगो न भवितुमर्हति । अर्थात् पाप दृष्टावपि सूर्य दृष्टौ पितृकारकौ स्यातान्तदा दशवर्षं पूर्वं न पितृमरणमिति पूर्वयोगस्यापवादो ज्ञेयः । लग्न सप्तम भावयोर्मध्ये यो राशिर्बलवान् तस्य राशेः रूद्रशूलदशायां पितुर्निर्याणम् ज्ञेयम् । अयं भावो त्र यदि लग्न राशिर्बलवान् तस्य शूल दशायां मातृमरणं ज्ञेयम् । लग्नात्सप्तमाद्वा यश्च तृतीया राशिर्बलवांस्तस्य राशेः शूलदशायां भ्रातृमरणं वाच्यम् । लग्नात्सप्तमाद्वा यश्च तृतीया राशिर्बलवांस्तस्य राशेः शूलदशायां भ्रातृमरणं वाच्यम् । लग्नात्सप्तमाद्वा यश्चैकादशो राशिस्तस्य दशायां ज्येष्ठभ्रातुर्मरणम् वाच्यम् । लग्नात्सप्तमाद्वा यो नवमो राशिर्बलवास्तस्य शूलदशायां वा ज्येष्ठ भ्रातुर्मरणं प्रोक्तम् । लग्नात्सप्तमाद्वा भावाधश्च पंचमोराशिर्बलवास्तस्य शूल दशायां भगिन्या पुत्रस्य च मरणं ज्ञेयम् ।

स्व स्त्रीकारको यो ग्रहः स्यात्तस्या श्रयीभूत राशि त्रिकोण दशायां स्त्रीमरणं प्रोक्तम् । एवं सर्वत्र कलत्रादिभावेभ्यस्तया [illegible] कलत्रारूढादिक लग्नेभ्यो पि कलत्र पुत्रादिकस्य सुख दुःखयोस्यथा युदयादिकस्य फलं वाच्यम् ।

मातृ पितृ पुत्र कलत्रादिक भावेभ्यस्तेषां कारकाश्रित राशीभ्यश्च तृतीये भावे शुभ ग्रह दृष्टे सति शुभ योगेन मरणमिति ज्ञेयम् । अयं भावो त्र यत्सर्वेषां मातृ पितृ पुत्र कलत्रादीनां भावेभ्यः कारकेभ्यो भावेशेभ्यः कारकेशेभ्यो वा तृतीय भावस्य शुभ पाप ग्रह योगानुसारमेव तेषां तेषां शुभ शुभात्मकं मरणं भवतीति निश्चितम् ।

मरण निमित्त योग :-

अत्र तृतीये भावे सूर्ये दृष्टे युते वा बलान्विते सति राजहेतोर्मरणं जायते । शनि राहुभ्यां युते दृष्टे वा तृतीय भावे विषाग्निकारणं जलादग्नि पीडनाद्वा मरणं प्रोक्तम् । गर्तादुच्चात्प्रपतनं बन्धान्मरणं वा- वाच्यम् । चन्द्रमान्दी च यदि तृतीयस्थौ षष्ठस्थौ वा स्यातान्तदा कृमि कुष्ठादिना मरणं भवति । गुरुणा दृष्टे युते वा तृतीये शोकादिनामरणं प्रोक्तम् । शुक्रेण दृष्टे युते वा तृतीये प्रमेह रोगादिना मरणं वाच्यम् ।

शुभाशुभ योगेन दृष्ट्या वा तृतीय भावस्यानुरूपं तत्तद्ग्रह रोगानुसारं मरणं ज्ञेयम् । यदि बहुग्रह युतिर्दृष्टिर्वा तृतीय भावे स्यात्तदा बहुरोगानुसारमपि मरणं वाच्यम् ।

तृतीये भावे शुभ ग्रहश्चेत्तदा शुभ देशे मरणम् । पापश्चेत्तदा पाप देशे मरणं वाच्यम् । अत्र शुभ शब्देन काश्यादिरत्र ज्ञेयम् । कीकटपापादि शब्देन मगधादि देशस्य विचारो ज्ञेयः । मिश्र ग्रहैः मिश्रस्थले मृत्युर्भवति अत्र मिश्रस्थल शब्देन पाप पुण्य क्षेत्रयो- र्मध्यस्थ क्षेत्र ज्ञानं कार्यम् ।

यदि लग्न षष्ठभावयोर्मध्ये शनिराहुकेतवः स्युस्तदा मातुः संस्कारं जातको न कर्तुमर्हति । अथ च सप्तम द्वादशभावयोर्मध्ये शनिराहु केतवो भवेयुस्तदा पितु संस्कारं कर्तुं न शक्नोतीतिभावः ।

## दशारम्भ क्रमः

ज्योतिष शास्त्रे दशाया महत्वपूर्णं स्थानमस्ति । अयमेव महानाश्चर्य करः प्रकारो यत्र पाश्चात्याः साम्प्रतमपि मुह्यन्ति । अनेन प्रकारेणैव मानवस्य सकल जीवन फल निरूपणं भवति । जन्मकुण्डली चक्रे तु विविध राजयोग दरिद्र योगानां पितृ मातृ पुत्र भ्रातृ जायादिकानां विविध वस्तूनां सुख दुःखादिकं ज्ञानमेतेषां प्राप्ति वियोग दर्शन रूपेश्वर्यादि विविध निरूपणं भवति । परन्तु प्रश्नस्त्वायमत्र प्रादुर्भवति यत्कदा जन्मना दरिद्रो पि राजयोगं प्राप्तस्तथा राजकुले जातो पि दरिद्रतां प्राप्त इति दृष्ट्वा मनसि चैयमकांक्षा समुत्पद्यते यदि मे राज दरिद्र योगाः कदा फलं ? कदा विवाहः, कस्मिन् काले मातृ पितृ मरणं कदा राज्य प्राप्तिः, कदा सुतोत्पत्तिः कदा बन्धयोगः कदा भाग्योदयं कदायुषः समाप्तिरित्यादि वस्तूनां निर्देशनं दशा प्रकारेण ज्ञातुं शक्यते । आचार्यैः द्वि चत्वारिंशद् भेदा निरूपिताः सन्ति । फल ज्ञानार्थम पंच चास्या भेदाः ।

### अन्तर्दशा प्रकारमाह -

यस्य ग्रहस्य महादशायां यस्तग्रहस्य अन्तर्दशा ज्ञानस्यावश्यकता स्यात्तस्यैव ग्रहस्य महादशावर्षाणां गुणनं कृत्वा दश संख्याया भागमाहरेत् लब्धा मास संख्या भवति ।

### स्थिर दशा -

अत्र राशीनां चरदशावत् दशा क्रमो नास्ति चरदशायां तु राशीश स्थिति वशाद्विभिन्नानि वर्षाणि भवन्ति । परमत्र तु वर्षाणां निश्चित संख्यामस्ति अत एवेयं स्थिरदशोच्यते ।

'विषमे तवादिर्नवांशाः' ^२६

चर राशीनां ७ स्थिराणां ८ द्विस्वभावानां तु ९ दशावर्षाणां संख्या निश्चिता । यत्र ब्रह्म ग्रहस्तिष्ठति तद् राशिं पुरस्कृत्य विषमे क्रमेण समेव्युत्क्रमेण चरदशावद्दशाक्रमो स्तीति भावः । लग्नात् षष्ठेशाष्टमेशद्वादशेशेषु यो बली तथा लग्न सप्तमयोर्मध्ये यो बलवान् राशिस्तद्राशितः पृष्ठे षड् राशिषु यो विषम राशिगो ग्रहो विद्यते स ब्रह्मग्रह इत्युच्यते । यदि राहो ब्रह्मत्वं प्राप्तं भवति तर्हि वैपरीत्यमर्थात् यो ग्रहो न्यूनांशो स ब्रह्मा भवति । आत्माकारकाद् अष्टमेशो अष्टमस्थो वा ग्रहो ब्रह्मा भवति । विवादे तु सर्वेषु बलावनेव ग्रहो ब्रह्मेति भावः ।

शूलदशा :

द्वितीयाष्टम भावयोर्मध्ये यो बलवान् राशिः स रुद्रशूल संज्ञक इति निगद्यते । तं रुद्रशूल राशिं पुरस्कृत्य स्थिरदशावत् दशाक्रमः चरराशिषु ७ स्थिरेषु ८ द्विस्वभावेषु ९ वर्षसंख्या पूर्वोक्ता तथा च विषमे क्रमेण समेव्युत्क्रमेणेति भावः । इयं दशा शूलग्रहमधिकृत्य निरूपिता । अतएवास्या नामापि शूलदशेति निर्याण विचारे चैयमुपयोगिनी ।

अथ द्वितीयाध्यायस्य चतुर्थ पादान्तर्गते अन्तर्दशा बल दशाबल तथा च द्वार बाह्यराशि बल विवेचनं अस्मिन् प्रबन्धे द्वितीयाध्यायस्य प्रथम द्वितीये पादे कृतंवर्तं । अथ प्रबन्ध विस्तार भयात् अत्र तस्य विवेचनस्यावश्यकता न दृश्यते ।

अथ केन्द्रादि दशा निरूपणम् -

लग्न सप्तमयोर्मध्ये यो बलवान् राशिस्त स्मात्प्रकारत्रयेण दशाक्रमो

विद्यते । यदि बलवान् राशिश्चरो भवेत्तर्हि । तस्मादेव विषमे क्रमेण समे व्युत्क्रमेण दशारम्भो भवति । यदि स्थिर राशिर्भवेत्तर्हि तस्मात्तु षष्ठ राशितो विषमे क्रमेण समे व्युत्क्रमेण दशाक्रमो भवति ।

विषमे पूर्वं केन्द्रगतानां राशीनां ततश्च पणफराणामतः परमापोक्लिम राशीनां दशा कथिता । समे तु पूर्वं केन्द्रगतानां राशीनां ततश्चापोक्लिमानामतः परं पणफराणामिति भावः दशा वर्ष संख्या तु प्रत्येक राशे ६ इति ज्ञेया । [१७]

## कारक केन्द्र दशा :

इयमपि केन्द्रादि दशा वद् ज्ञेया । अर्थात् विषम राशिस्थे च कारके पूर्वं केन्द्र गतानां राशीनां पुनश्च पणफराणान्त तश्चापोक्लिमानां दशाक्रमो भवति । कारके च समराशिस्थे सति पूर्वं केन्द्र गतानां पुनश्चापोक्लिमानां ततश्च दशवर्षमानंच प्रत्येकस्य पूर्वोक्ता ६ संख्येव । [१८]

## ग्रह नक्षत्र राशिदशा :-

जन्म सम्पद्विपत्क्षेम प्रत्यरि साधक बाधक यमैत्रानामानि च क्रमात्सूर्य चन्द्र भौम राहु गुरु शनि बुध केतु शुक्राणामिति । ग्रहेषु यः केन्द्रस्थो ग्रहस्तस्य पूर्वं दशा क्रमः केन्द्र ग्रहेषु बहुषु ग्रहेषु यो बलवच मस्तस्यादिमा दशेति बोधव्यम् । दशवर्ष संख्या पि विंशोत्तरी वत्कथिता अस्य भुक्त योग्यानय प्रकारो पि विंशोत्तरीवदेव । केवलं ग्रहाणां तारानामकरण कारणेन चास्या

दशाया अपि तारा नामेतिभाव: ।

नक्षत्र दशा - नक्षत्रमधिकृत्य या दशा भवति सा नक्षत्र दशा । आषोत्तरी विंशोत्तरीवा परं नाम । 'सिद्धा उडुदाये'[१९]

इति सूत्रे प्रतिपादिता वर्तते । जन्म नक्षत्रस्य सर्व भोग घटिका द्वादशभिर्विभजेत् लब्धसंख्यया जन्मलग्नादारभ्य राशिं पुरस्कृत्य दशाक्रमं विजानीयात् । वर्ष संख्या च प्रत्येक राशे: ६ इति निश्चिता यथा जन्मलग्नं मिथुनं नक्षत्रंचोत्तरा फाल्गुनी सर्वर्क्ष भोग षष्टि घटिका: । गत नक्षत्र घटिका चतुर्दशेति । मिथुनात्तृतीयं सिंह राशि पूर्वकं द्वादश राशीनां दशेति भाव: ।[२०]

योगार्द्ध दशा - इयमपिदशा लग्न सप्तमयोर्मध्ये बलवन्तं राशिमधिकृत्य प्रवृत्ता भवति । चरस्थिरदशा लब्धानां वर्षाणां योगं कृत्वा तदर्द्ध वर्ष संख्या ग्राह्या । अत एवेयं योगार्द्ध दशेति । यथा इ चरदशायां मेष राशौ पंचवर्षाणि तथा स्थिर दशायां सप्तयोगे च द्वादशात्र च षड्वर्षाणि ग्राह्यमिति ।[२१]

दृग्दशा :

राशीनां दृष्टिप्रकारमनुसृत्येयं दशा प्रवृत्ता । लग्नात्पूर्वं नवम् राशिस्ततश्च दृष्टिचक्रे सम्मुख राशि: कुत्र चित्क्रमेण कुत्र चिद् व्युत्क्रमेण । एकादशस्य च सम्मुख राशि: । नन्वत्र च प्रश्नश्चायां यन्नवमदशमैका दशेषु प्रथमं सम्मुख राशि: कथं ग्रहणं कृतं कुतो न पंचम राशि: ग्रहणामिति, अभिपश्यन्त्यृक्षाणि पार्श्वभेचेति प्रमाणात्पंचम राशि: प्रथमं ग्रहणाभाव: । अत एवेयं त्रिकूटदशा । तेन पूर्वं नवमस्य दशमस्यैकादशस्य द्वादशा भवति । अतश्चेयं नवम दृग्दशा, दशम दृग्दशैका दश

दृग्दशेति भाव: । पंचमैकादश योर्विषमे वैपरीत्यं समे तु सामान्यम् । वृष वृश्चिक राशि द्वयस्य विषमे गणनास्ति । अतोऽत्र वैपरीत्यं बोध्यम् । अर्थात् वृश्चिकयोर्विषम पदस्थत्वा दुत्क्रमेणैव पंचमैका दशौ दृग्योग्यौ भवत: । सिंह कुम्भ राशि द्वयस्य तु समपदे ग्रहणाथ चा सामान्यमत्रापि व्युत्क्रमेणैव पंचमैकादशौ दृग्योग्यौ भवत: । द्विस्वभाव राशिषु पंचमैकादश योर्दृग्योग्यत्वं नास्ति ।

लग्नान्नवम दशमैकादशेषु द्विस्वभाव राशिषु प्रथमन्तेषामेव ततश्च सप्तमस्य पुनश्च विषमे क्रमेण समे च व्युत्क्रमेण चतुर्थ दशमयोर्दृग्दशेति भाव: । दशावर्षसंख्यातु सर्वेषां राशीनां क्रमशो ६ संख्यावैव अस्यायं स्पष्टार्थ: । यदि लग्नान्नवम राशिश्चरस्तर्हि प्रथमं नवमस्य तस्माच्च पुनरष्टम पंचम नवमानां क्रमशो दशा भवति । स्थिरराशिश्चेत्तर्हि प्रथमं नवमस्यैव पुनश्च व्युत्क्रमेण षष्ठस्य पंचमस्य नवमस्य च दृग्दशेति भाव: । यदि द्विस्वभाव राशिश्चेत्तर्हि प्रथमं तस्य द्विस्वभावस्य ततश्च विषमे सति सप्तमस्य क्रमेण च चतुर्थदशमयो: समे राशौ सति सप्तमस्य व्युत्क्रमेण च दशम चतुर्थयोर्दृग्दशेति ज्ञेया ।

अयं सर्वो भावो त्र मुम्बई संस्करणे जैमिनिय सूत्रस्याचार्य नीलकण्ठ कृत टीकानुसार मुपलभ्यते ।[22] काशी संस्करणे तु भिन्न मार्गो वर्तते । तत्रायं पाठ: पूर्वं लग्नान्नवमराशेस्ततश्च तद् दृष्टानां राशीनां पुनश्च दशम राशेस्ततश्च तद् दृष्टानां राशीनां पुनश्चैकादश राशेस्ततश्च तद्दृष्टानां राशीनां दृष्ट्यनुसार-मियं दृग्दशा भवति । अत्रापि क्रमत्रयमेव । लग्नान्नवम राशिश्चेत्तर्हि व्युत्क्रमेण स्थिरश्चेत्तर्हि क्रमेण द्विस्वभावे राशौ विषमे सति तु क्रमेण समे सति तु व्युत्क्रमेण ।

त्रिकोण दशा :-

त्रिकोणे यो बलवान् राशिस्तं पुरस्कृत्य चरदशावच्च वर्षक्रममानीय विषमराशौ क्रमेण समराशौ च व्युत्क्रमेण दशाक्रमो बोध्या ।

प्रयोजनम् -

अत्र द्वारबाह्याभ्यां फल विचारं कुर्यात् । वर्तमान दशाराशेर्नाम द्वारं तथा प्रथम दशाप्रदराशितो द्वाराशि पर्यन्तं यावती वर्ष संख्या भवति सा बाह्य शब्देनोच्यते । तथा सप्तम तृतीय प्रथम नवम राशिभ्यः स्त्री मातृ शरीर पितृणांचापि विचारो विधेयः । अर्थात्पत्नीकारकाद्ग्रहात् सप्तमे पत्नी विचारः । मातृ कारकात्तृतीये भ्रातृविचारः । आत्मकारका प्रथमे शरीर विचारः । पितृकारको न्नवमे पितृविचारः ।[23]

दशान्तर्दशानां शुभाशुभत्वाह - शुभदशा शुभ उच्यते धाम्न्युच्चे वा[24] जातकेन दशानुरूपं फलमवश्यमेव भोक्तव्यम् । यतो हीदं फलं पूर्वं जन्म कृत सुकृत दुष्कृतानुरूपं ग्रह योगानुसारमस्मिन् जन्मनि भवति । दशानुसारेण फलं वदन्ति मुनय मुनीश्वराजात शुभाशुभं यत् ।[25] अत्र दशाफल कथने मुनीश्वराणां परम्परासीदिति । अत्र लग्नदशाया ग्रहणमस्ति नारदपुराणे सनन्देन नारदम्प्रति ज्योतिष शास्त्रं प्रोक्तम् । पराशरात्पूर्वं सनन्दनस्यापि परम्परा दृश्यते ।

पराशरादुत्तरवर्तिभिरा चार्यैं विद्वद्भिश्च सर्वै प्रायो दशाफल निरूपण मार्गो नुसृतः महर्षिं जैमिनिना तु विविध दशानां जैमिनि सूत्रे वर्णनं विहितम् ।

तासां सर्वासां मूलं बृहत्पाराशरे विद्यते । चरदशा, नवांशदशा, स्थिरदशा,शूलदशा, ब्रह्मदशा, केन्द्रदशा, कारक केन्द्र दशा, मण्डूक दशा, नक्षत्र दशा, योगार्ध दशा दृग्दशा, त्रिकोण दशा, लग्नादि द्वादश राशि दशानां वर्णनमुपलभ्यते । कारकेन्द्र दशा शब्देन कारकेन्द्र राशि दशा ग्रह केन्द्र दशयोर्ग्रहणं भवति । नक्षत्र दशाया च विंशोत्तर्यष्टोत्तर्यां ग्रहाणां ज्ञेयम् ।[२६] जातक भरणे आचार्य दुण्ढिराजेन ३०,३१,३२, ३३ तमे अध्याये सद् सद् दशा विचारणास्यादि दशाफल महादशाफलान्तर्दशाफल-कथना ४७४७ नाम्नांकिता: ।

'दशानुरोधेन फलं वदन्ति मुनीश्वरा जात शुभाशुभंतत् ।
सारं समुद्धृत्य तदेव वक्ष्ये भेदं यथा विस्तरतो दशानाम् ।।[२७]

आचार्य पुंजराजेन शम्भुहोरा प्रकाशे १० तमे ध्याये दशान्तर्दशा फल नाम्नांकिता:। तत्रत्यं कटेशस्य छाया दृश्यते । अत्राष्टक वर्गीय दशान्तर्दशा क्रमेण ग्रहाणां फलमपि लिखितम् ।[२८] कालिदास रचिते उत्तर कालामृते पि षष्ठो दशाफल नाम्ना खण्डो दृश्यते । अत्र च ग्रहाणा मुच्च दीप्तावस्थानुसारं फलमंकितम् । विंशोत्तरी दशाक्रमो पि विद्यते । मानसागर्यामपि पंचमे ध्याये दशा निरूपणामुपलभ्यते । अत्र च विंशोत्तरी दशाष्टोत्तरी दशा सन्ध्यादशा पाचक दशा योगिनी ४७४७ दशानां वर्णनमुपलभ्यते ।

अत्र ४२ संख्याकाभेदा दशाया बृहत्पाराशरे एव दृश्यते येषां सर्वेषां भेदानां पराशरस्परवर्तिषु ग्रन्थेषु चर्चा नोपलभ्यते । केषांचिद भेदानामुल्लेखो जैमिनिसूत्रे विद्यते इति पूर्वं लिखितमस्ति ।

--

## सन्दर्भ-सूची (२)


१- फलदीपिका । मन्त्रेश्वर:, के०एस०कृष्णमूर्ति, बैंगलौर, १३।५
२- जैमिनीय सूत्रम्, २।१।१-७ पृ०सं० ५६
३- जैमिनीय सूत्राणि, नीलकण्ठ टीका, २।१।४-५
४- जैमिनीय सूत्रम्- बी० सूर्यनारायणराव, पृ०सं० १२७
५- बृहत्पाराशरी पूर्वार्ध, २४।३३
६- जैमिनीय सूत्रम् ।
७- -तत्रैव- पृ०सं० ७० २।१।१०-११
८- जैमिनीय सूत्राणि- श्री वैंकटेश्वर प्रेस, मुंबई ।२।१।१६
९- -तत्रैव- २।१।१५
१०- -तत्रैव- २।१।१६
११- -तत्रैव- २।१।२०
१२- -तत्रैव- २।१।३२-३३
१३- -तत्रैव- २।१।३५ पृ० ८०
१४- -तत्रैव- २।१।५१-५२ पृ० ८४
१५- -तत्रैव-
१६- जैमिनिसूत्रम् २।३।१ पृ०सं० ६१
१७- -तत्रैव- २।४।७-१०
१८- -तत्रैव- २।४।१८
१९- -तत्रैव- २।४।२७
२०- -तत्रैव- २।४।२७
२२- जैमिनीय सूत्राणि २।४।११-२३, पृ०सं० ६६
२३- जैमिनि सूत्रम् २।३।२७
२४- -तत्रैव- २।३।३५ पृ०सं० ११६
२५- बृहत्पाराशरी उत्तरार्ध १२-४२
२६- नारदमहापुराणम्, संक्षिप्त नारद विष्णुपुराणांकम् 'कल्याण' १९५४, गीताप्रेस, गोरखपुर
२७- सर्वार्थ चिन्तामणि: अ-१३-१४, १५, १६-श्रीमधीधर शर्मा ।
२८- शम्भु होरा प्रकाश -अ०-१०-श्री महीधर शर्मा ।